च्याप्तिकर्मा। तस्य लुङि 'मन्त्रे घस°' इत्यादिना च्लेर्लुक्। छन्दस्यपि दृश्यत इत्याडागमः॥ ˇपराचैः पराञ्चि पराङ्मुखान्यावृत्तिवर्जितानि यानि गमनानि तैः ˇजगुरिः उद्गूर्णः। महता प्रयत्नेनापि गन्तुं न शक्यत इत्यर्थः॥ 'गॄ निगरणे'। 'आदृगमहन°' इत्यादिना किन्प्रत्ययः। 'बहुलं छन्दसि' (पा. सू. ७. १. १०३) इत्युत्वम्॥ तादृशोऽयम् ˇअध्वा ˇदूरे ˇहि विप्रकृष्टः खलु। यद्वा। पराचैः पराञ्चनैर्जगुरिरित्यर्थं गन्त्री पार्ष्णिभागमनालोकमाना सतीदं स्थानं प्राप्नोति। दूरेऽयमध्वा यदृच्छया गन्तुं न शक्यते। अतो वयमेतां पृच्छामः। हे सरमे ˇका कीदृशी ˇअस्मेहितिः। कोऽस्मास्वर्थहितिः। कोऽस्मासु त्वदपेक्षितार्थो निहितः। यद्वा। अस्मासु कोऽर्थो गतः। दधातेर्हिनोतेर्वा क्तिनि रूपम्। आगच्छन्त्यास्तव ˇका कीदृशी ˇपरितक्म्या रात्रिः ˇआसीत्। यद्वा। तकतिर्गत्यर्थः। परितकनं परितो गमनं भ्रमणं वा कीदृशमासीत्। ˇकथं च[1] ˇरसायाः शब्दायमानाया अन्तरिक्षनद्या योजनशतविस्तीर्णायाः ˇपयांसि उदकानि ˇअतरः तीर्णवत्यसि। एतद्वद। अत्र 'किमिच्छन्ती सरमेदं प्रानट्' (निरु. ११. २५) इत्यादिकं निरुक्तं द्रष्टव्यम्॥

इन्द्र॑स्य दू॒तीरि॑षि॒ता च॑रामि म॒ह इ॒च्छन्ती॑ पणयो नि॒धीन्वः॑।
अ॒ति॒ष्कदो॑ भि॒यसा॒ तन्न॑ आव॒त्तथा॑ र॒साया॑ अत॒रं पयां॑सि॥ २॥

इन्द्र॑स्य। दू॒तीः। इ॒षि॒ता। च॒रा॒मि॒। म॒हः। इ॒च्छन्ती॑। प॒ण॒यः॒। नि॒ऽधीन्। वः॒।
अ॒ति॒ऽस्कदः॑। भि॒यसा॑। तत्। नः॒। आ॒व॒त्। तथा॑। र॒साया॑। अ॒त॒र॒म्। पयां॑सि॥ २॥

अनया तान् सरमा[2] प्रत्युवाच[2]। हे ˇपणयः एतन्नामका असुराः ˇइन्द्रस्य ˇदूतीः। 'सुपां सुलुक्°' इति प्रथमैकवचनस्य सुश्छान्दसः। अहम् ˇइषिता तेनैव प्रेषिता सती ˇचरामि। युष्मदीयं स्थानमागच्छामि। किमर्थम्। ˇवः युष्मदीयान् युष्मदीये पर्वतेऽधिष्ठापितान् ˇमहः महतः ˇनिधीन् बृहस्पतेर्गोनिधीन् ˇइच्छन्ती कामयमाना सती चरामि। किंच ˇअतिष्कदः॥ 'स्कन्दिर् गतिशोषणयोः'। भावे क्विप्। अतिष्कन्दनादतिक्रमणाज्जातेन ˇभियसा भयेन ˇतत् नदीजलं ˇनः। पूजायां बहुवचनम्। माम् ˇआवत् अरक्षत्। ˇतथा तेन प्रकारेण ˇरसायाः नद्याः ˇपयांसि उदकानि ˇअतरं तीर्णवत्यस्मि॥

की॒दृङ्ङिन्द्रः॑ सरमे॒ का दृ॑शी॒का यस्ये॒दं दू॒तीरस॑रः परा॒कात्।
आ च॒ गच्छा॑न्मि॒त्रमे॑ना दधा॒माथा॒ गवां॒ गोप॑ति॒र्नो भ॑वाति॥ ३॥

की॒दृङ्। इन्द्रः॑। स॒र॒मे॒। का। दृ॒शी॒का। यस्य॑। इ॒दम्। दू॒तीः। अस॑रः। प॒रा॒कात्।
आ। च॒। गच्छा॑त्। मि॒त्रम्। ए॒न॒। द॒धा॒म॒। अथ॑। गवा॑म्। गोऽप॑तिः। नः॒। भ॒वा॒ति॒॥ ३॥

तेषां वाक्यम्। हे ˇसरमे तव स्वामी ˇइन्द्रः ˇकीदृक्। कियत्पराक्रमवान्। ˇका ˇदृशीका। तस्य कीदृशी दृष्टिः। दृष्टिरूपा सेना कियती। ˇयस्य ˇदूतीः दूती त्वम् ˇइदम् अस्मदीयं स्थानं ˇपराकात् अतिदूरात् ˇअसरः आगमः। इति तामुक्त्वा इदानीं ते परस्परमाहुः। एषा सरमा ˇआ ˇगच्छात् ˇच आगच्छतु च। गमेर्लेट्याडागमः। स्वामी ˇभवाति भवतु। न ह्येकस्या गोः किंतु बहूनां गवां स्वामी भवतु। वृत्त्यवृत्तिभ्यां स्वामित्वं बाहुल्यं च विवक्ष्यते॥

१. ग-त-भ१.२.४.८-मु—वा। २. ग—सरमा प्र ऊचो; त-भ-मु—सरमेत्यूचे।

